# CCE PR

**ಸಂಕೇತ ಸಂಖ್ಯೆ : 67-S ವಿಷಯ : ತೃತೀಯ ಭಾಷೆ — ಸಂಸ್ಕೃತ**

**Code No. : 67-S Subject : Third Language — SANSKRIT**

**तृतीय भाषा — संस्कृतम्**

**( ಹೊಸ ಪಠ್ಯಕ್ರಮ / New Syllabus )**

**( ಪುನರಾವರ್ತಿತ ಖಾಸಗಿ ಅಭ್ಯರ್ಥಿ / Private Repeater )**

***ಸಾಮಾನ್ಯ ಸೂಚನೆಗಳು :***

i) ಇದು ಪ್ರಶ್ನೆ–ಸಹಿತ–ಉತ್ತರಪುಸ್ತಕವಾಗಿದೆ.

ii) ಪ್ರತಿ ಪ್ರಶ್ನೆಗೂ ಉತ್ತರ ಬರೆಯಲು ಪ್ರಶ್ನೋತ್ತರ ಪತ್ರಿಕೆಯಲ್ಲಿಯೇ ಸ್ಥಳಾವಕಾಶ ಮಾಡಿಕೊಡಲಾಗಿದೆ. ಉತ್ತರಗಳನ್ನು ನಿರ್ದಿಷ್ಟಪಡಿಸಿದ ಜಾಗದಲ್ಲಿಯೇ ಬರೆಯಬೇಕು.

iii) ಈ ಪ್ರಶ್ನೋತ್ತರ ಪತ್ರಿಕೆಯು ***A, B, C ವಿಭಾಗ***ಗಳಿಂದ ಕೂಡಿದ್ದು ಒಟ್ಟು 57 ಪ್ರಶ್ನೆಗಳನ್ನೊಳಗೊಂಡಿದೆ.

***'A' ವಿಭಾಗ***ದಲ್ಲಿ ಗದ್ಯ, ಪದ್ಯ, ಪೂರಕ ಪಾಠಗಳಿಗೆ ಸಂಬಂಧಿಸಿದ 38 ಪ್ರಶ್ನೆಗಳಿವೆ.

***'B' ವಿಭಾಗ***ದಲ್ಲಿ ವ್ಯಾಕರಣಕ್ಕೆ ಸಂಬಂಧಿಸಿದ 14 ಪ್ರಶ್ನೆಗಳಿವೆ.

***'C' ವಿಭಾಗ***ದಲ್ಲಿ ರಚನಾ ವಿಭಾಗಕ್ಕೆ ಸಂಬಂಧಿಸಿದ 5 ಪ್ರಶ್ನೆಗಳಿವೆ.

iv) ವಿದ್ಯಾರ್ಥಿಗಳು ಸೀಸದ ಕಡ್ಡಿ (ಪೆನ್ಸಿಲ್) ಯಿಂದ ಉತ್ತರಗಳನ್ನು ಬರೆಯಬಾರದು. ಪೆನ್ಸಿಲ್‌ನಿಂದ ಉತ್ತರ ಬರೆದಲ್ಲಿ ಮೌಲ್ಯಮಾಪನಕ್ಕೆ ಪರಿಗಣಿಸಲಾಗುವುದಿಲ್ಲ.

v) ಪ್ರಶ್ನೆ ಪತ್ರಿಕೆಯನ್ನು ಓದಲು 15 ನಿಮಿಷಗಳ ಹೆಚ್ಚಿನ ಕಾಲಾವಕಾಶ ನೀಡಲಾಗಿದೆ.

vi) ನಿಮ್ಮ ಪ್ರಶ್ನೋತ್ತರ ಕಿರುಪುಸ್ತಕದ ಬಲಭಾಗದಲ್ಲಿರುವ ಗೆರೆಯ ಪಕ್ಕದ ಖಾಲಿ ಜಾಗದಲ್ಲಿ ಯಾವುದೇ ರೀತಿಯ ಬರಹಗಳನ್ನು ಬರೆಯಬಾರದು.

***परीक्षार्थिनां सामान्याः सूचना :***

i) इदं प्रश्नयुक्तम् उत्तरपुस्तकम् अस्ति ।

ii) अस्मिन् प्रश्नयुक्ते उत्तरपुस्तके प्रत्येकं प्रश्नस्य उत्तरं लेखितुं स्थलावकाशः प्रकल्पितः । निर्दिष्टस्थानेषु एव उत्तराणि लेखनीयानि ।

iii) अस्मिन् प्रश्नयुक्त उत्तरपुस्तके ***A, B, C*** इति भागत्रयं भवति । आहत्य 57 प्रश्नाः भवन्ति ।

***'A'*** विभागे गद्य-पद्य-पूरकपाठसम्बन्धिनः 38 प्रश्नाः भवन्ति ।

***'B'*** विभागे व्याकरणसम्बन्धिनः 14 प्रश्नाः भवन्ति ।

***'C'*** विभागे रचनासम्बन्धिनः 5 प्रश्नाः भवन्ति ।

iv) परीक्षार्थिनः उत्तराणि अङ्कनी (पेन्सिल्) द्वारा न लिखेयुः । पेन्सिल् द्वारा लिखितानि उत्तराणि मौल्यमापनार्थं न परिगण्यन्ते ।

v) परीक्षार्थिभ्यः प्रश्नानां पठनार्थम् अर्थग्रहणार्थं च पञ्चदशनिमेषकालावकाशः अधिकः प्रदत्तः ।

vi) दक्षिण पार्श्वे आरक्षित स्थाने किमपि न लेखनीयम् ।

## विभागः - A

### ( गद्यम्-पद्यम्-पूरकपाठाः )

I. एकवाक्येन उत्तरं लिखत – 14 × 1 = 14

1. ढुण्ढिराजः कः ?
2. का जनकेन सह पुस्तकमेलां गतवती ?
3. मेलायाः आयोजिका संस्था का ?
4. कः ज्ञानं लभते ?
5. पठनार्थं का आवश्यिका ?
6. विवेकानन्दस्य शिष्यः कः ?
7. दिलीपः भूमिं काम् इव शशास ?
8. अर्जुनः अन्ते किं ज्ञातवान् ?
9. किं तथैव तिष्ठति ?
10. मेलुकोटे कस्मिन् मण्डले अस्ति ?
11. सीतां कः अपहृतवान् ?
12. कम् आदाय हनूमान् लङ्कातः प्रतस्थे ?
13. लङ्कानगरं केषां राजधानी ?
14. कदा योगिनीचक्रं पूजनीयम् ?

II. रिक्तस्थानानि पूरयत – 3 × 1 = 3

15. अर्जुनस्य सारथिः ...................................... आसीत् ।
16. जृम्भस्व सिंह, ...................................... ते गणयिष्ये ।
17. ...................................... धर्म इवाश्रितः ।

III. संयोज्य लिखत – 4 × 1 = 4

| अ | | आ | |
|---|---|---|---|
| 18. | दशकण्ठः | a) | घोषणम् |
| 19. | हृदयम् | b) | रामः |
| 20. | उद्घोषः | c) | मृत्तिकामयूरः |
| 21. | क्रीडनकम् | d) | सदयम् |
| | | e) | रावणः |
| | | f) | वनम् । |

IV. **द्वि-त्रैः** वाक्यैः संस्कृतभाषया उत्तरं लिखत – 3 × 2 = 6

22. पुस्तकमेलायाः वेदिकायां के कार्यक्रमाः अभवन् ?

23. कर्मणः विषये भगवतः अभिप्रायः कः ?

**अथवा**

कतिविधाः जनाः देवं भजन्ते ? ते च के ?

24. विक्रमः योगिनीं किमिति ययाचे ?

V. श्लोकतात्पर्यं कन्नडभाषया आंग्लभाषया वा लिखत – 2 × 2 = 4

25. मनसि वचसि काये पुण्यपीयूषपूर्णाः
त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः ।
परगुणपरमाणून्पर्वतीकृत्य नित्यं
निजहृदि विलसन्तस्सन्ति सन्तः कियन्तः ।।

26. अशनं भिन्नं वसनं भिन्नम्
रूपं भिन्नं रीतिरपि ।
भिन्नं भाग्यं भिन्नो वर्णः
भिन्नं सर्वं भेददृशे ।।

**अथवा**

हिमालयो नः पूज्यश्शैलः
पूज्यनदी सा गङ्गाम्बा ।
साहित्यं नस्सङ्गीतमपि
भाषाभेदेऽप्येकमिह ।।

VI. संस्कृतभाषया अनुवादं कुरुत – 2

27. ಇಂದು ರವಿವಾರ ಶಾಲೆಗೆ ವಿರಾಮವಿದೆ. ನಾಳೆ ಸೋಮವಾರ ನಾವು ಶಾಲೆಗೆ ಹೋಗುವೆವು.

VII. कर्नाटकभाषया अनुवादं कुरुत – 2

28. शिवपार्वत्योः पुत्रः गणेशः । सः गजाननः विघ्ननाशकः च ।

VIII. कवेः देश-काल-ग्रन्थानां विषये लिखत – 3

29. 'वेदव्यासः'

**अथवा**

'भोजराजः'

IX. यथानिर्देशम् उत्तरं लिखत – 3 × 3 = 9

30. "मया एतानि सर्वाणि पुस्तकानि पठितानि"

कः पाठः ? कः अवदत् ? कम् अवदत् ?

31. "भवान् कर्णाय साधुवादं यच्छति"

कः पाठः ? कः अवदत् ? कम् अवदत् ?

32. "हन्त ! वर्धते ते संरम्भः"

कः पाठः ? का अवदत् ? कम् अवदत् ?

X. कर्णाटकभाषया, आङ्गलभाषया, संस्कृतभाषया वा उत्तरं लिखत – 4 × 3 = 12

33. भारतस्य विविधतायाम् एकतां वर्णयत ।

34. मेलुकोटे क्षेत्रम् अधिकृत्य लिखत ।

35. राजा विक्रमार्कस्य औदार्यं कथं ज्ञातवान् ?

36. 'धूर्तो न सेव्यः' पाठस्य कथासारांशं लिखत ।

**अथवा**

'अक्कमहादेवी' विषये लिखत ।

XI. श्लोकद्वयं पूरयत – 2 × 4 = 8

37. तमोघ्नाय .................................................................................. ।

.................................................................................. पतये नमः ॥

38. शीलं ..................................................................................

.................................................................................. निधिः ॥

## विभागः - B

### ( व्याकरणविभागः )

XII. निम्नलिखितेषु प्रश्नेषु अपूर्णविवरणषु वा प्रत्येकाय चत्वारः विकल्पाः प्रदत्ताः । तेषु एकमेव शुद्धं उपयुक्तं वा वर्तते । उपयुक्तं विकल्पं चित्वा प्रश्नस्य समक्षे निर्दिष्टस्थाने अक्षरसहितम् अस्योत्तरं पूरयतु – $12 \times 1 = 12$

39. 'हरिरेव' – अत्र अयं सन्धिः भवति –

(A) जश्त्वः (B) विसर्गः

(C) गुणः (D) सवर्णदीर्घः ।

40. 'उत्सवः' – एतस्य पर्यायपदम् इदं भवति –

(A) पर्व (B) वृष्टिः

(C) देवः (D) सागरः ।

41. मेलुकोटे साधकानां तीर्थक्षेत्रः । इदं वाक्यं शुद्धं भवति –

(A) मेलुकोटे साधकानां तीर्थक्षेत्रे (B) मेलुकोटे साधकानां तीर्थक्षेत्रम्

(C) मेलुकोटे साधकानां तीर्थक्षेत्राणि (D) मेलुकोटे साधकानां तीर्थक्षेत्रेण ।

42. 'अचिरेण' – एतस्य विरुद्धार्थक पदम् इदं भवति –

(A) विचरेण (B) चरेण

(C) चिरेण (D) विचारेण ।

43. 'चन्द्रोदयः' – अत्र सन्धिविभजनम् एवं भवति –

(A) चन्द्रो + उदयः (B) चन्द्रा + उदयः

(C) चन्द्रः + उदयः (D) चन्द्र + उदयः ।

44. 'प्रश्नान्' – अस्य एकवचनरूपम् इदम् –

(A) प्रश्नम् (B) प्रश्नेभ्यः

(C) प्रश्नयोः (D) प्रश्नाः ।

45. 'प्रेषयति' – अस्य बहुवचनरूपम् एवं भवति –

(A) प्रेषयामि (B) प्रेषयतः

(C) प्रेषयसि (D) प्रेषयन्ति ।

46. 'त्रिभुवनम्' – अस्य विग्रहवाक्यम् एवं भवति –

(A) त्रीणि भुवनानि (B) त्री भुवनम्

(C) त्रयाणां भुवनानां समाहारः (D) भुवनानां त्रयम् ।

47. 'लम्बोदरः' – अत्र अयं समासः अस्ति –

(A) तत्पुरुषः (B) अव्ययीभावः

(C) द्वन्द्वः (D) बहुव्रीहिः ।

48. 'सूत्रधारः' अत्र एषा विभक्तिः भवति –

(A) षष्ठो (B) सप्तमी

(C) चतुर्थी (D) प्रथमा ।

49. पठितवती, लिखितवती, पठिता, नीतवती – अत्र समूहेतरपदम् इदं भवति –

(A) पठितवती (B) लिखितवती

(C) पठिता (D) नीतवती ।

50. 'अगच्छत्' – अत्र एषः लकारः अस्ति –

(A) लृट् (B) लङ्

(C) लट् (D) लोट् ।

XIII. चतुर्थपदं लिखत – $2 \times 1 = 2$

51. i) निपुणस्य भावः – निपुणता :: अर्हस्य भावः – ............................ ।

ii) कुन्त्याः अपत्यं पुमान् – कौन्तेयः :: गङ्गायाः अपत्यं पुमान् – ................. ।

XIV. कृदन्तपदं चित्वा लिखत – $2 \times 1 = 2$

52. i) देवी विराजमाना अस्ति ।

ii) शिवेन लोकः रक्षितः ।

# विभागः - C

## ( रचनाविभागः )

XV. अलङ्कारं विवृणुत – 2

53. "मुखं चन्द्रः इव सुन्दरम्" ।

XVI. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दसः नाम लिखत – 2

54. मनसि वचसि काये पुण्यपीयूषपूर्णाः ।

XVII. पत्रं लिखत – 4

55. अध्ययनविषये मित्रं प्रति पत्रं लिखत ।

**अथवा**

दिनद्वयस्य विरामं सम्प्रार्थ्य मुख्योपाध्यायं प्रति विराम पत्रं लिखत ।

XVIII. प्रबन्धम् लिखत – 5

56. परिसरसंरक्षणम् ।

**अथवा**

कर्नाटकराज्योत्सवः ।

XIX. गद्यभागं पठित्वा प्रश्नानां उत्तरं लिखत – 4 × 1 = 4

57. कस्मिंश्चित् ग्रामे बहुकालपर्यन्तम् अनावृष्टिः आसीत् । भूमिः शुष्का जाता पेयजलस्य अपि अभावः जातः । तदा जनाः दैवज्ञस्य समीपं गत्वा पृष्टवन्तः । तदा सः 'त्रीणि वर्षाणि वृष्टिः न भविष्यति' इति उक्तवान् । तत् श्रुत्वा ग्रामवासिनः सर्वे जीवनार्थं बहुदूरं गतवन्तः । सः ग्रामः एव निर्जनः जातः ।

i) बहुकालपयन्तं कुत्र अनावृष्टिः आसीत् ?

ii) कस्य अभावः जातः ?

iii) जनाः कस्य समीपं गत्वा पृष्टवन्तः ?

iv) दैवज्ञः कति वर्षाणि वृष्टिः न भविष्यति इति उक्तवान् ?